।। नवग्रह मंत्र, जप, कवच, स्तोत्र ।।

॥ सूर्य ग्रह ॥

सूर्य कलिंग देश में उद्भव। कश्यप गोत्र। जाति क्षत्रिय। माता अदिति। जन्म समय नाम मार्तण्ड। प्रथम पत्नी संज्ञा जिससे वैवस्वत मनु, यम, यमी उत्पन्न हुए। दूसरी पत्नी छाया जिससे सावर्णिकी मनु, शनि, ताप्ती, अश्विनी

- **शुभाशुभत्व - क्रूर ग्रह**
- **भोग काल - एक मास - 30 दिन**
- **बीज मंत्र - ॐ घृणि: सूर्याय नम: / ॐ ह्रीं ह्रौं सूर्याय नम: / ॐ सूर्याय नम:**
- **तांत्रिक मंत्र - ॐ ह्राँ ह्रीं ह्रौं स: सूर्याय नम:**
- **वैदिक मंत्र - ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥**
- **पुराणोक्त मंत्र - ॐ जपाकुसुम संकाशं काश्यपेयं महाद्युतिम्।
तमोरिं सर्व पापघ्नं प्रणतोऽस्मि दिवाकरम्॥**
- **जप संख्या - 7000 कलयुगे चतुर्थगुणो अर्थात 28000 + दशांश हवन - 2800 + दशांश तर्पण - 280 + दशांश मार्जन - 28 = 31108**
- **जप समय - सूर्योदय काल**
- **हवनवस्तु - अर्क, मदार**
- **रत्न - 6.5 रत्ती मीणिक या विद्रुम**
- **दान वस्तु - सुवर्ण, ताँबा, माणिक, गुड, गेहूँ, लाल गाय, लाल पुष्प, लाल वस्त्र, लाल चंदन**

सूर्य कवचम् .....

विनियोग - अस्य श्री सुर्य कवच स्तोत्रस्य। ब्रह्मा ऋषि:। अनुष्टुप छंद:। सूर्यो देवता। सूर्य प्रीत्यर्थे जपे विनियोग:॥

याज्ञवल्क्य उवाच .....

**श्रणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम्।
शरीरारोग्दं दिव्यं सव सौभाग्य दायकम्॥१॥**

**देदीप्यमान मुकुटं स्फुरन्मकर कुण्डलम।
ध्यात्वा सहस्त्रं किरणं स्तोत्र मेततु दीरयेत्॥२॥**

**शिरों में भास्कर: पातु ललाट मेडमित दुति:।
नेत्रे दिनमणि: पातु श्रवणे वासरेश्वर: ॥३॥**

**घ्राणं धर्मं धृणि: पातु वदनं वेद वाहन:।
जिव्हां में मानद: पातु कण्ठं में सुर वन्दित: ॥४॥**

**रक्षात्मकं स्तोत्रं लिखित्वा भूर्ज पत्रके।
दधाति य: करे तस्य वशगा: सर्व सिद्धय: ॥५॥**

**सुस्नातो यो जपेत् सम्यग्योधिते स्वस्थ: मानस:।
सरोग मुक्तो दीर्घायु सुखं पुष्टिं च विदंति ॥६॥**

सूर्य स्तोत्रम् .....

नवग्रहाणां सर्वेषां सूर्यादीनां पृथक् पृथक्।
पीड़ा च दु:सहा राजंजायते सततं नृणाम् ॥१॥

पीडानाशाय राजेन्द्र नामानि श्रृणु भास्वत:।
सूर्यादीनां च सर्वेषां पीड़ा नश्यति श्रृण्वत: ॥२॥

आदित्य: सविता सूर्य: पूषाऽर्क: शीघ्रगो रवि:।
भगस्त्वष्टाऽर्यमा हंसो हंलिस्तेजोनिधिर्हरि: ॥३॥

दिननाथो दिनकर: सत्पसप्ति: प्रभाकर:।
विभावसुर्वेदकर्ता वेदांगो वेदवाहन: ॥४॥

हरिदश्व: कालवक्त्र: कर्मसाक्षी जगत्पति:।
पद्मिनीबोधको भानुर्भास्कर: करूणाकर: ॥५॥

द्वादशात्मा विश्वकर्मा लोहितांगस्तमोनुद:।
जगन्नाथोऽरविन्दाक्ष: कालात्मा कश्यपात्मज:॥६॥

भूताक्षयो ग्रहपति: सर्वलोकनमस्कृत:।
जपाकुसुमसंकाशो भास्वानदितिनन्दन: ॥७॥

ध्वान्तेभसिंह सर्वात्मा लोकनेत्रो विकर्तन:।
मार्तण्डो मिहिर: सूरस्तपनो लोकतापन: ॥८॥

जगत्कर्ता जगत्साक्षी शनैश्चरपिता जय:।
सहस्त्ररश्मिस्तरणिर्भगवान्भक्तवत्सल: ॥९॥

विवस्वानादिदेवश्च देवदेवा दिवाकर:।
धन्वन्तरिव्र्याधिहर्ता दद्रुकुष्ठविनाशक: ॥१०॥

चराचरात्मा मैत्रेयोऽमितो विष्णुर्विकर्तन:।
लोकशोकापहर्ता च कमलाकर आत्मभू: ॥११॥

नारायणो महादेवो रूद्र: पुरूष ईश्वर:।
जीवात्मा परमात्मा च सूक्ष्मात्मा सर्वतोमुख: ॥१२॥

इन्द्रोऽनलो यमश्चैव नैर्ऋतो वरूणोऽनिल:।
श्रीद ईशान इन्दुश्च भौम: सोम्यो गुरू: कवि: ॥१३॥

शौरिर्विधुन्तुद: केतु: काल: कालात्मको विभु:।
सर्वदेवमयो देव: कृष्ण: कामप्रदायक: ॥१४॥

य एतैर्नामभिर्मत्र्यो भक्त्या स्तौति दिवाकरम्।
सर्वापापविनिर्मुक्त: सर्वरोगविवर्जित: ॥१५॥

पुत्रवान् धनवान् श्रीमांजायते स न संशय:।
रविवारे पठेद्यस्तु नामान्येतानि भास्वत: ॥१६॥

पीड़ाशान्तिर्भवेत्तस्य ग्रहाणां च विशेषत:।
सद्य: सुखमवाप्नोति चायुर्दीर्घं च नीयजम् ॥१७॥

॥ इति श्री भविष्य पुराणे आदित्य स्तोत्रम् सम्पूर्णम्॥

भगवान सूर्य के पवित्र, शुभ एवं गोपनीय 21 नाम .....

विकर्तनो विवस्वांश्च मार्तण्डो भास्करो रवि: ।
लोक प्रकाशक: श्री माँल्लोक चक्षुर्मुहेश्वर:॥१॥

लोकसाक्षी त्रिलोकेश: कर्ता हर्ता तमिस्रहा ।
तपनस्तापनश्चैव शुचि: सप्ताश्ववाहन:॥२॥

गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृत: ।
एकविंशतिरित्येष स्तव इष्ट: सदा रवे:॥३॥

विकर्तन, विवस्वान, मार्तण्ड, भास्कर, रवि, लोकप्रकाशक, श्रीमान, लोकचक्षु, महेश्वर, लोकसाक्षी, त्रिलोकेश, कर्ता, हर्त्ता, तमिस्राहा, तपन, तापन, शुचि, सप्ताश्ववाहन, गभस्तिहस्त, ब्रह्मा और सर्वदेव नमस्कृत

॥ चन्द्रमा ग्रह ॥

चन्द्रमा यमुना नदी से उद्भव। आत्रि गोत्र। जाति वैश्य। शुक्ल वर्ण। दक्ष प्रजापति की 27 कन्याओं से विवाह। 27 कन्यायें 27 नक्षत्रों के नाम से जानी जाती है।

- **शुभाशुभत्व - शुभ ग्रह**
- **भोग काल - सवा दो दिन - 2.25 दिन**
- **बीज मंत्र - ॐ सों सोमाय नमः / ॐ ऐं क्लीं सोमाय नमः / ॐ चन्द्राय नमः**
- **तांत्रिक मंत्र - ॐ श्राँ श्रीं श्रौं सः चंद्राय नमः**
- **वैदिक मंत्र - ॐ इमं देवा असपत्न$ सुवध्वं महते क्षत्राय महते ज्यैष्ठयाय महते जानराज्यायेन्द्रस्येन्द्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणाना$ राजा॥**
- **पुराणोक्त मंत्र - ॐ दधि शंख तुषाराभं क्षीरोदार्णव सम्भवम। नमामि शशिनं सोमं शंभोर्मुकुट भूषणं॥**
- **जप संख्या - 11000 कलयुगे चतुर्थगुणो अर्थात 44000 + दशांश हवन - 4400 + दशांश तर्पण - 440 + दशांश मार्जन - 44 = 48884**
- **जप समय - संध्याकाल**
- **हवनवस्तु - पलाश**
- **रत्न - 10 रत्ती मोती**
- **दान वस्तु - सुवर्ण, चाँदी, मोती, चावल, कपुर, घी, चाँदी शंख, सफेदपुष्प, सफेदवस्त्र, सफेद बैल**

चंद्र कवचम् .....

विनियोग - अस्य श्री चंद्र कवच स्तोत्र महा मंत्रस्य। गौतम ऋषिः। अनुष्टुप छंदः। श्री चंद्रो देवता। चंद्रः प्रीत्यर्थे जपे विनियोगः॥

समं चतुर्भुजं वंदे केयूर मकुटोज्वलम्।
वासुदेवस्य नयनं शंकरस्य च भूषणम् ॥१॥

एवं ध्यात्वा जपेन्नित्यं शशिनः कवचं शुभम्।
शशिः पातु शिरो देशं भालं पातु कलानिधि ॥२॥

चक्षुषीः चंद्रमाः पातु श्रुती पातु निशापतिः।
प्राणं कृपाकरः पातु मुखं कुमुदबांधवः ॥३॥

पातु कण्ठं च मे सोमः स्कंधौ जैवा तृकस्तथा।
करौ सुधाकरः पातु वक्षः पातु निशाकरः ॥४॥

हृदयं पातु मे चंद्रो नाभिं शंकरभूषणः।
मध्यं पातु सुरश्रेष्ठः कटिं पातु सुधाकरः ॥५॥

ऊरू तारापतिः पातु मृगांको जानुनी सदा।
अब्दिजः पातु मे जंघे पातु पादौ विधुः सदा ॥६॥

सर्वाण्यन्यानि चांगानि पातु चंद्रोऽखिलं वपु: ।
य: पठेत च्छृणुयाद्वापि सर्वत्र विजयी भवेत ॥७॥

ऐतद्धि कवचं दिव्यं भुक्ति मुक्ति प्रदायकम् ।

॥ इती श्री चंद्र कवचं संपूर्णम् ॥

चन्द्र स्तोत्र .....

श्वेताम्बर: श्वेतवपु: किरीटी, श्वेतद्युतिर्दण्डधरो द्विबाहु: ।
चन्द्रो मृतात्मा वरद: शशांक:, श्रेयांसि मह्यं प्रददातु देव: ॥१॥

दधिशंखतुषाराभं क्षीरोदार्णवसम्भवम ।
नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम ॥२॥

क्षीरसिन्धुसमुत्पन्नो रोहिणी सहित: प्रभु: ।
हरस्य मुकुटावास: बालचन्द्र नमोऽस्तु ते ॥३॥

सुधायया यत्किरणा: पोषयन्त्योषधीवनम ।
सर्वान्नरसहेतुं तं नमामि सिन्धुनन्दनम ॥४॥

राकेशं तारकेशं च रोहिणीप्रियसुन्दरम ।
ध्यायतां सर्वदोषघ्नं नमामीन्दुं मुहुर्मुहु: ॥५॥

॥ इति मन्त्रमहार्णवे चन्द्रमस: स्तोत्रम ॥

चंद्र अष्टाविंशतिनाम स्तोत्रम् .....

विनियोग - अस्य श्री चंद्र स्याष्टाविंशति नाम स्तोत्रस्य । गौतम ऋषि: । विराट् छंद: । सोमो देवता । चंद्रस्य प्रीत्यर्थे जपे विनियोग: ॥

चंद्रस्य शृणु नामानि शुभदानि महीपते ।
यानि शृत्वा नरो दु:खान्मुच्यते नात्रसंशय: ॥१॥

सुधाकरश्च सोमश्च ग्लौरब्ज: कुमुदप्रिय: ।
लोकप्रिय: शुभ्रभानुश्चंद्रमा रोहिणीपति ॥२॥

शशी हिमकरो राजा द्विजराजो निशाकर: ।
आत्रेय इंदु: शीतांशुरोषधीश: कलानिधि: ॥३॥

जैवातृको रमाभ्राता क्षीरोदार्णव संभव: ।
नक्षत्रनायक: शंभु: शिरश्चूडामणिर्विभु: ॥४॥

तापहर्ता नभोदीपो नामान्येतानि य: पठेत् ।
प्रत्यहं भक्तिसंयुक्तस्तस्य पीडा विनश्यति ॥५॥

तद्दिने च पठेद्यस्तु लभेत् सर्वं समीहितम् ।
ग्रहादीनां च सर्वेषां भवेच्चंद्रबलं सदा ॥६॥

॥ इति श्री चंद्राष्टाविंशतिनाम स्तोत्रम् संपूर्णम् ॥

॥ मंगल ग्रह ॥

मंगल अवन्ति देश में उत्पत्ति। भारद्वाज गोत्र। जाति क्षत्रिय। रक्त वर्ण।

- **शुभाशुभत्व - पाप ग्रह**
- **भोग काल - डेढ मास - 40 दिन**
- **बीज मंत्र - ॐ अं अंगारकाय नमः / ॐ हूँ श्रीं भौमाय नमः / ॐ भौमाय नमः**
- **तांत्रिक मंत्र - ॐ क्राँ क्रीं क्रौं सः भौमाय नमः**
- **वैदिक मंत्र - ॐ अग्निमूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपा $ रेता $ सि जिन्वति॥**
- **पुराणोक्त मंत्र - ॐ धरणी गर्भ संभूतं विद्युत्कान्ति समप्रभम। कुमारं शक्ति हस्तञ्च मंगलं प्रणमाम्यहम॥**
- **जप संख्या - 10000 कलयुगे चतुर्थगुणो अर्थात 40000 + दशांश हवन - 4000 + दशांश तर्पण - 400 + दशांश मार्जन - 40 = 44440**
- **जप समय - दिन का प्रथम प्रहर**
- **हवनवस्तु - खदिर (खैर)**
- **रत्न - 12.5 रत्ती मूँगा**
- **दान वस्तु - सुवर्ण, ताँबा, मूंगा, मसुर, गुड, गेहूँ, लाल बैल, लालपुष्प, लालवस्त्र,**

मंगल कवचम् .....

विनियोग - अस्य श्री अंगारक कवच स्तोत्र मंत्रस्य। कश्यप ऋषिः। अनुष्टुप् छन्दः। अङ्गारको देवता भौम पीडा परिहारार्थं पाठे विनियोगः॥

रक्तांबरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत्।
धरासुतः शक्तिधरश्च शूली सदा ममस्याद्वरदः प्रशांतः ॥१॥

अंगारकः शिरो रक्षेन्मुखं वै धरणीसुतः।
श्रवौ रक्तांबरः पातु नेत्रे मे रक्तलोचनः ॥२॥

नासां शक्तिधरः पातु मुखं मे रक्तलोचनः।
भुजौ मे रक्तमाली च हस्तौ शक्तिधरस्तथा ॥३॥

वक्षः पातु वरांगश्च हृदयं पातु लोहितः।
कटिं मे ग्रहराजश्च मुखं चैव धरासुतः ॥४॥

जानु जंघे कुजः पातु पादौ भक्तप्रियः सदा।
सर्वण्यन्यानि चांगानि रक्षेन्मे मेषवाहनः ॥५॥

या इदं कवचं दिव्यं सर्वशत्रु निवारणम्।
भूतप्रेतपिशाचानां नाशनं सर्व सिद्धिदम् ॥६॥

सर्वरोगहरं चैव सर्वसंपत्प्रदं शुभम्।
भुक्तिमुक्तिप्रदं नृणां सर्वसौभाग्यवर्धनम् ॥७॥

॥ इति श्रीमार्कण्डेयपुराणे मंगलकवचं संपूर्ण ॥

अङ्गारक स्तोत्रम् .....

विनियोग - अस्य श्री अंगारक स्तोत्रस्य मंत्रस्य । विरुपांगिरस ऋषि: । अग्नि देवता । गायत्री छन्द: । भौम प्रीत्यर्थे पाठे विनियोग: ॥

अंगारक: शक्तिधरो लोहिताङ्गो धरासुत: ।
कुमारो मङ्गलो भौमो महाकायो धनप्रद: ॥१॥

ऋणहर्ता दृष्टिकर्ता रोगकृद्रोगनाशन: ।
विद्युत्प्रभो व्रणकर: कामदो धनहृत् कुज: ॥२॥

सामगानप्रियो रक्तवस्त्रो रक्तायतेक्षण: ।
लोहितो रक्तवर्णश्च सर्वकर्मावबोधक: ॥३॥

रक्तमाल्यधरो हेमकुण्डली ग्रहनायक: ।
नामान्येतानि भौमस्य य: पठेत्सततं नर: ॥४॥

ऋणं तस्य च दौर्भाग्यं दारिद्र्यं च विनश्यति ।
धनं प्राप्नोति विपुलं स्त्रियं चैव मनोरमाम् ।
वंशोद्द्योतकरं पुत्रं लभते नात्र संशय: ॥५॥

योऽर्चयेदह्नि भौमस्य मङ्गलं बहुपुष्पकै: ।
सर्वा नश्यति पीडा च तस्य ग्रहकृता ध्रुवम् ॥६॥

॥इति श्री स्कान्दपुराणे श्री अङ्गारकस्तोत्रं सम्पूर्णम्॥

ऋणमोचक मंगल स्तोत्र .....

मंगलो भूमिपुत्रश्च ऋणहर्ता धनप्रद: ।
स्थिरामनो महाकाय: सर्वकर्मविरोधक: ॥१॥

लोहितो लोहिताक्षश्च सामगानां। कृपाकरं ।
वैरात्मज: कुजौ भौमो भूतिदो भूमिनंदन: ॥२॥

धरणीगर्भसंभूतं विद्युत्कान्तिसमप्रभम् ।
कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम् ॥३॥

अंगारको यमश्चैव सर्वरोगापहारक: ।
वृष्टे: कर्ताऽपहर्ता च सर्वकामफलप्रद: ॥४॥

एतानि कुजनामानि नित्यं य: श्रद्धया पठेत् ।
ऋणं न जायते तस्य धनं शीघ्रमवाप्नुयात् ॥५॥

स्तोत्रमंगारकस्यैतत्पठनीयं सदा नृभि: ।
न तेषां भौमजा पीडा स्वल्पाऽपि भवति क्वचित् ॥६॥

अंगारको महाभाग भगवन्भक्तवत्सल ।
त्वां नमामि ममाशेषमृणमाशु विनाशय: ॥७॥

ऋणरोगादिदारिद्रयं ये चान्ये ह्यपमृत्यव: ।
भयक्लेश मनस्तापा: नश्यन्तु मम सर्वदा ॥८॥

अतिवक्र दुराराध्य भोगमुक्तजितात्मन: ।
तुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात् ॥९॥

विरञ्चि शक्रादिविष्णूनां मनुष्याणां तु का कथा ।
तेन त्वं सर्वसत्वेन ग्रहराजो महाबल: ॥१०॥

पुत्रान्देहि धनं देहि त्वामस्मि शरणं गत: ।
ऋणदारिद्रयं दु:खेन शत्रुणां च भयात्तत: ॥११॥

एभिर्द्वादशभि: श्लोकैर्य: स्तौति च धरासुतम् ।
महतीं श्रियमाप्नोति ह्यपरा धनदो युवा: ॥१२॥

॥ इति श्रीस्कन्दपुराणे भार्गवप्रोक्त ऋणमोचन मंगलस्तोत्रम् ॥

॥ बुध ग्रह ॥

बुध मगध देश में उत्पत्ति। अत्री गोत्र। जाति वैश्य। पिता चंद्रमा।

- **शुभाशुभत्व** - **शुभ ग्रह**
- **भोग काल** - **एक मास - 30 दिन**
- **बीज मंत्र** - **ॐ बुं बुधाय नमः / ॐ ऐं श्रीं श्रीं बुधाय नमः / ॐ बुधाय नमः**
- **तांत्रिक मंत्र** - **ॐ ब्राँ ब्रीं ब्रौं सः बुधाय नमः**
- **वैदिक मंत्र** - **ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सऽ सृजेथामयञ्च। अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यशमानश्च सीदत॥**
- **पुराणोक्त मंत्र** - **ॐ प्रियंगुकलिकाश्यामं रूपेणाप्रतिमं बुधम। सौम्यं सौम्य गुणोपेतं तं बुधं प्रणमाम्यहम॥**
- **जप संख्या** - **9000 कलयुगे चतुर्थगुणो अर्थात 36000 + दशांश हवन - 3600 + दशांश तर्पण - 360 + दशांश मार्जन - 36 = 17776**
- **जप समय** - **मध्याह्न काल**
- **हवनवस्तु** - **अपामार्ग, चिचिडा**
- **रत्न** - **6.5 रत्ति पन्ना**
- **दान वस्तु** - **सुवर्ण, कांस्य, पन्ना, मूंग, घी, हाथी, कस्तूरी, सर्वपुष्प, हरावस्त्र, पंचरत्न, हाथी दाँत**

बुध कवचम् .....

विनियोग - अस्य श्री बुधकवच स्तोत्र मन्त्रस्य। कश्यप ऋषिः। अनुष्टुप् छन्दः। बुधो देवता बुधप्रीत्यर्थे जपे विनियोगः।

बुधस्तु पुस्तकधरः कुंकुमस्य समद्युतिः।
पीताम्बरधरः पातु पीतमाल्यानुलेपनः ॥१॥

कटिं च पातु मे सौम्यः शिरोदेशं बुधस्तथा।
नेत्रे ज्ञानमयः पातु श्रोत्रे पातु निशाप्रियः ॥२॥

घ्राणं गन्धप्रियः पातु जिह्वां विद्याप्रदो मम।
कण्ठं पातु विधोः पुत्रो भुजौ पुस्तकभूषणः ॥३॥

वक्षः पातु वरांगश्च हृदयं रोहिणीसुतः।
नाभिं पातु सुराराध्यो मध्यं पातु खगेश्वरः ॥४॥

जानुनी रौहिणेयश्च पातु जंघेऽखिलप्रदः।
पादौ मे बोधनः पातु पातु सौम्योऽखिलं वपुः ॥५॥

एतद्धि कवचं दिव्यं सर्वपापप्रणाशनम्।
सर्वरोगप्रशमनं सर्व दुःख निवारणम् ॥६॥

आयुरारोग्यशुभदं पुत्रपौत्रप्रवर्द्धनम्।
यः पठेच्छृणुयाद्वापि सर्वत्र विजयी भवेत् ॥७॥

॥ इति श्रीब्रह्मवैवर्तपुराणे बुधकवचं सम्पूर्णम् ॥

बुध स्तोत्रम् .....

पीताम्बर: पीतवपु किरीटी, चतुर्भुजो देवदु:खापहर्ता।
धर्मस्य धृक सोमसुत: सदा मे, सिंहाधिरुढ़ो वरदो बुधश्च ॥१॥

प्रियंगुकनकश्यामं रूपेणाप्रतिमं बुधम।
सौम्यं सौम्यगुणोपेतं नमामि शशिनन्दनम ॥२॥

सोमसुनुर्बुधश्चैव सौम्य: सौम्यगुणान्वित:।
सदा शान्त: सदा क्षेमो नमामि शशिनन्दनम ॥३॥

उत्पातरूपी जगतां चन्द्रपुत्रो महाद्युति:।
सूर्यप्रियकरोविद्वान पीडां हरतु मे बुधं ॥४॥

शिरीषपुष्पसंकाशं कपिलीशो युवा पुन:।
सोमपुत्रो बुधश्चैव सदा शान्तिं प्रयच्छतु ॥५॥

श्याम: शिरालश्चकलाविधिज्ञ:, कौतूहली कोमलवाग्विलासी।
रजोधिको मध्यमरूपधृक स्या-दाताम्रनेत्रो द्विजराजपुत्र: ॥६॥

अहो चन्द्रासुत श्रीमन मागधर्मासमुदभव:।
अत्रिगोत्रश्चतुर्बाहु: खड्गखेटकधारक: ॥७॥

गदाधरो नृसिंहस्थ: स्वर्णनाभसमन्वित:।
केतकीद्रुमपत्राभ: इन्द्रविष्णुप्रपूजित: ॥८॥

ज्ञेयो बुध: पण्डितश्च रोहिणेयश्च सोमज:।
कुमारो राजपुत्रश्च शैशवे शशिनन्दन: ॥९॥

गुरुपुत्रश्च तारेयो विबुधो बोधनस्तथा।
सौम्य: सौम्यगुणोपेतो रत्नदानफलप्रद: ॥१०॥

एतानि बुधनामानि प्रात: काले पठेन्नर:।
बुद्धिर्विवृद्धितां याति बुधपीडा न जायते ॥११॥

॥ इति मंत्रमहार्णवे बुधस्तोत्रम संपूर्णम् ॥

बुध पञ्चविंशतिनाम स्तोत्रम् .....

विनियोग - अस्य श्री बुध पञ्चविंशतिनाम स्तोत्रस्य प्रजापति ऋषिः। त्रिष्टुप् छन्दः। बुधो देवता। बुधप्रीत्यर्थे पाठे विनियोगः॥

बुधो बुद्धिमतां श्रेष्ठो बुद्धिदाता धनप्रदः।
प्रियङ्गुकलिकाश्यामः कञ्जनेत्रो मनोहरः ॥१॥

ग्रहपमो रौहिणेयो नक्षत्रेशो दयाकरः।
विरुद्धकार्यहन्ता च सौम्यौ बुद्धिविवर्धनः ॥२॥

चन्द्रात्मजो विष्णुरूपी ज्ञानी ज्ञो ज्ञानिनायकः।
ग्रहपीडाहरो दारपुत्रधान्यपशुप्रदः ॥३॥

लोकप्रियः सौम्यमूर्तिर्गुणदो गुणिवत्सलः।
पञ्चविंशतिनामानि बुधस्यैतानि यः पठेत् ॥४॥

स्मृत्वा बुधं सदा तस्य पीडा सर्वा विनश्यति।
तद्दिने वा पठेद्यस्तु लभते स मनोगतम् ॥५॥

॥ इति श्रीपद्मपुराणे बुधपञ्चविंशतिनामस्तोत्रं सम्पूर्णम् ॥

॥ बृहस्पति ग्रह ॥

गुरु सिन्धु देश में उत्पत्ति। अंगिरस गोत्र। जाति ब्राह्मण। पीता अंगिरस। पुत्र कच। पीत वर्ण। उत्तर दिशा।

- **शुभाशुभत्व - शुभ ग्रह**
- **भोग काल - एक वर्ष - 365 दिन**
- **बीज मंत्र - ॐ बृं बृहस्पतये नम: / ॐ ह्रीं क्लीं हूँ बृहस्पतये नम: / ॐ गुरवे नम:**
- **तांत्रिक मंत्र - ॐ ग्रां ग्रीं ग्रौं स: गुरवे नम:**
- **वैदिक मंत्र - ॐ बृहस्पते अति यदर्यो अर्हाद्युम द्विभाति क्रतुमज्जनेषु।**
  यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्॥
- **पुराणोक्त मंत्र - ॐ देवानां च ऋषीणां च गुरुं काचन सन्निभम।**
  बुध्दि भूतं त्रिलोकेशं तं नमामि बृहस्पितम॥
- **जप संख्या - 19000 कलयुगे चतुर्थगुणो अर्थात 76000 + दशांश हवन - 7600 + दशांश तर्पण - 760 + दशांश मार्जन - 76 = 84436**
- **जप समय - प्रात:काल (सूर्योदय के समय)**
- **हवनवस्तु - पीपल**
- **रत्न - 6.5 रत्ति पुखराज**
- **दान वस्तु - सुवर्ण, कांस्य, पुखराज, हल्दी, नमक, शक्कर, घोडा,**
  पीतपुष्प, पीतवस्त्र, पीतधान्य, माणिक या विद्रुम

बृहस्पति कवचम् (ब्रह्मयामलोक्तम्) .....

विनियोग - अस्य श्री बृहस्पति कवच महामन्त्रस्य। ईश्वर ऋषि:। अनुष्टुप छन्द:। बृहस्पति देवता।
गं बीजं। श्रीं शक्ति:। क्लीं कीलकम्। बृहस्पति प्रीत्यर्थे पाठे विनियोग:।

अभीष्टफलदं देवं सर्वज्ञं सुरपूजितम्।
अक्षमालाधरं शान्तं प्रणमामि बृहस्पतिम्॥१॥

बृहस्पति: शिर: पातु ललाटं पातु में गुरु:।
कर्णौ सुरुगुरु: पातु नेत्रे मेंऽभीष्टदायक:॥२॥

जिह्वां पातु सुराचायो नासां में वेदपारग:।
मुखं मे पातु सर्वज्ञो कण्ठं मे देवता शुभप्रद:॥३॥

भुजौ आङ्गिरस: पातु करौ पातु शुभप्रद:।
स्तनौ मे पातु वागीश: कुक्षिं मे शुभलक्षण:॥४॥

नाभिं देवगुरु: पातु मध्यं पातु सुखप्रद:।
कटिं पातु जगदवन्द्य: ऊरू मे पातु वाक्पति:॥५॥

जानु जङ्गे सुराचायो पादौ विश्वात्मकस्तथा।
अन्यानि यानि चाङ्गानि रक्षेन् मे सर्वतो गुरु:॥६॥

इत्येतत् कवचं दिव्यं त्रिसन्ध्यं य: पठेन्नर:।
सर्वान् कामानवाप्नोति सर्वत्र विजयी भवेत्॥७॥

॥ इति श्री ब्रह्मयामलोक्तम् बृहस्पति कवचं सम्पूर्णम्॥

बृहस्पति कवचम् (मन्त्र महार्णवे) .....

पीताम्बर: पीतवपु: किरीटी, चतुर्भुजो देवगुरु: प्रशान्त: ।
दधाति दण्डं च कमण्डलुं च, तथाक्षसूत्रं वरदोऽस्तु मह्यम् ॥१॥

नम: सुरेन्द्रवन्द्याय देवाचार्याय ते नम: ।
नमस्त्वनन्तसामर्थ्यं देवासिद्धान्तपारग: ॥२॥

सदानन्द नमस्तेऽस्तु नम: पीडाहराय च ।
नमो वाचस्पते तुभ्यं नमस्ते पीतवाससे ॥३॥

नमोऽद्वितीयरूपाय लम्बकूर्चाय ते नम: ।
नम: प्रहृष्टनेत्राय विप्राणां पतये नम: ॥४॥

नमो भार्गवशिष्याय विपन्नहितकारक: ।
नमस्ते सुरसैन्याय विपन्नत्राणहेतवे ॥५॥

विषमस्थस्तथा नृणां सर्वकष्टप्रणाशनम् ।
प्रत्यहं तु पठेद्यो वै तस्य कामफलप्रदम् ॥६॥

॥ इति मन्त्रमहार्णवे बृहस्पतिस्तोत्रम् ॥

बृहस्पति स्तोत्रम् .....

विनियोग - अस्य श्री बृहस्पति स्तोत्रस्य । गृत्समद ऋषि: । अनुष्टुप् छन्द: । बृहस्पति र्देवता । बृहस्पति प्रीत्यर्थं जपे विनियोग: ।

गुरुर्बृहस्पतिर्जीव: सुराचार्यो विदां वर: ।
वागीशो धिषणो दीर्घश्मश्रु: पीताम्बरो युवा ॥१॥

सुधादृष्टिर्ग्रहाधीशो ग्रहपीडापहारक: ।
दयाकर: सौम्यमूर्ति: सुरार्च्य: कुड्मलद्युति: ॥२॥

लोकपूज्यो लोकगुरु: नीतिज्ञो नीतिकारक: ।
तारापतिश्चाङ्गिरसो वेदवेद्य: पितामह: ॥३॥

भक्त्या बृहस्पतिं स्मृत्वा नामान्येतानि य: पठेत् ।
अरोगी बलवान् श्रीमान् पुत्रवान् स भवेन्नर: ॥४॥

जीवेत् वर्षशतं मर्त्य: पापं नश्यति नश्यति ।
य: पूजयेत् गुरुदिने पीतगन्धाक्षताम्बरै: ॥५॥

पुष्पदीपोपहारैश्च पूजयित्वा बृहस्पतिम् ।
ब्रह्मणान् भोजयित्वा च पीडाशान्तिर्भवेत् गुरो: ॥६॥

॥ इति श्री स्कन्दपुराणे बृहस्पतिस्तोत्रं सम्पूर्णम् ॥

॥ शुक्र ग्रह ॥

शुक्र भोजकर्कट देश में उत्पत्ति। भार्गव गोत्र। जाति ब्राह्मण। दैत्य गुरु। संजीवनी विद्या ज्ञाता। इन्हीं के वंश में जामदग्नेय पुत्र परशुराम का अवतार हुआ था।

- **शुभाशुभत्व - शुभ ग्रह**
- **भोग काल - एक मास - 30 दिन**
- **बीज मंत्र - ॐ शुं शुक्राय नमः / ॐ ह्रीं श्रीं शुक्राय नमः / ॐ शुक्राय नमः**
- **तांत्रिक मंत्र - ॐ द्राँ द्रीं द्रौं सः शुक्राय नमः**
- **वैदिक मंत्र - ॐ अन्नात्परिस्त्रुतो रसं ब्रम्हणा व्यपिवत्क्षत्रं पयः सोमं प्रजापतिः।
  ऋतेन सत्यमिन्द्रियँ विपानऽ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु॥**
- **पुराणोक्त मंत्र - ॐ हिमकुन्द मृणालाभं दैत्यानां परमं गुरुम।
  सर्वशास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम॥**
- **जप संख्या - 16000 कलयुगे चतुर्थगुणो अर्थात 64000 + दशांश हवन - 6400 + दशांश तर्पण - 640 + दशांश मार्जन - 64 = 71104**
- **जप समय - ब्रह्मवेला (सुर्योदय)**
- **हवनवस्तु - गूलर**
- **रत्न - 1 रत्ति हीरा**
- **दान वस्तु - सुवर्ण, चाँदी, हीरा, चावल, घी, हल्दी, नमक, सफेदपुष्प, सफेदवस्त्र,सफेद घोडा**

शुक्र कवचम् .....

विनियोग - अस्य श्री शुक्र कवच स्तोत्र मन्त्रस्य। भारद्वाज ऋषिः। अनुष्टुप छन्दः। शुक्रो देवता। शुक्रप्रीत्यर्थे पाठे विनियोगः।

**मृणालकुन्देन्दुपयोजसुप्रभं पीताम्बरं प्रभृतमक्षमालिनम्।
समस्तशास्त्रार्थनिधिं महांतं ध्यायेत्कविं वान्छितमर्थसिद्धये ॥१॥**

**ॐ शिरो मे भार्गवः पातु भालं पातु ग्रहाधिपः।
नेत्रे दैत्यबृहस्पतिः पातु श्रोतो मे चन्दनद्युतिः ॥२॥**

**पातु मे नासिकां काव्यो वदनं दैत्यवन्दितः।
वचनं चोशनाः पातु कण्ठं श्रीकण्ठभक्तिमान् ॥३॥**

**भुजौ तेजोनिधिः पातु कुक्षिं पातु मनोव्रजः।
नाभिं भृगुसुतः पातु मध्यं पातु महीप्रियः ॥४॥**

**कटिं मे पातु विश्वात्मा उरू मे सुरपूजितः।
जानु जाड्यहरः पातु जंघे ज्ञानवतां वरः ॥५॥**

**गुल्फो गुणनिधिः पातु पादौ वराम्बरः।
सर्वाण्यंगानि मे पातु स्वर्णमालापरिष्कृतः ॥६॥**

**य इदं कवचं दिव्यं पठति श्रद्धयान्वितः।
न तस्य जायते पीड़ा भार्गवस्य प्रसादतः ॥७॥**

॥ इति श्रीब्रह्माण्डपुराणे श्रीशुक्रकवचस्तोत्रम् सम्पूर्णम् ॥

शुक्र स्तोत्रम् .....

नमस्ते भार्गव श्रेष्ठ देव दानव पूजित: ।
वृष्टिरोधप्रकर्त्रे च वृष्टिकर्त्रे नमो नम: ॥१॥

देवयानीपितस्तुभ्यं वेदवेदांगपारग: ।
परेण तपसा शुद्ध: शंकरो लोकशंकर: ॥२॥

प्राप्तो विद्यां जीवनाख्यां तस्मै शुक्रात्मने नम: ।
नमस्तस्मै भगवते भृगुपुत्राय वेधसे ॥३॥

तारामण्डलमध्यस्थ स्वभासा भासिताम्बर: ।
यस्योदये जगत्सर्वं मंगलार्हं भवेदिह ॥४॥

अस्तं याते ह्यरिष्टं स्यात्तस्मै मंगलरूपिणे ।
त्रिपुरावासिनो दैत्यान् शिवबाणप्रपीडितान् ॥५॥

विद्यया जीवयच्छुक्रो नमस्ते भृगुनन्दन ।
ययातिगुरवे तुभ्यं नमस्ते कविनन्दन ॥६॥

बलिराज्यप्रदो जीवस्तस्मै जीवात्मने नम: ।
भार्गवाय नमस्तुभ्यं पूर्वं गीर्वाणवन्दितम् ॥७॥

जीवपुत्राय यो विद्यां प्रादात्तस्मै नमोनम: ।
नम: शुक्राय काव्याय भृगुपुत्राय धीमहि ॥८॥

नम: कारणरूपाय नमस्ते कारणात्मने ।
स्तवराजमिदं पुण्यं भार्गवस्य महात्मन: ॥९॥

य: पठेच्छुणुयाद्वापि लभते वाँछितफलम् ।
पुत्रकामो लभेत्पुत्रान् श्रीकामो लभते श्रियम् ॥१०॥

राज्यकामो लभेद्राज्यं स्त्रीकाम: स्त्रियमुत्तमाम् ।
भृगुवारे प्रयत्नेन पठितव्यं सुसमाहितै: ॥११॥

अन्यवारे तु होरायां पूजयेद्भृगुनन्दनम् ।
रोगार्तो मुच्यते रोगात् भयार्तो मुच्यते भयात् ॥१२॥

यद्यत्प्रार्थयते वस्तु तत्तत्प्राप्नोति सर्वदा ।
प्रात: काले प्रकर्तव्या भृगुपूजा प्रयत्नत: ॥१३॥

सर्वपापविनिर्मुक्त: प्राप्नुयाच्छिवसन्निधि: ॥१४॥

॥ इति श्री स्कन्दपुराणे शुक्रस्तोत्रं सम्पूर्णम् ॥

शुक्र स्तोत्रम् .....

विनियोग - अस्य शुक्र स्तोत्र मन्त्रस्य । प्रजापति ऋषि: । अनुष्टुप छन्द: । शुक्रो देवता ।
शुक्र प्रीत्यर्थे पाठे विनियोग: ।

शुक्र: काव्य: शुक्ररेता: शुक्लांबरधर: सुधी:।
हिमाभ: कुन्दधवल: शुभ्रांशु: शुक्लभूषण: ॥१॥

नीतिज्ञो नीतिकृन्नीतिमार्गगामी ग्रहाधिप:।
उशना वेदवेदांगपारग: कविरात्मवित् ॥२॥

भार्गव: करुणासिन्धु: ज्ञानगम्य: सुतप्रद:।
शुक्रस्यैतानि नामानि शुक्रं स्मृत्वा तु य: पठेत् ॥३॥

आयुर्धनं सुखं पुत्रान् लक्ष्मीं वसतिमुत्तमाम्।
विद्यां चैव स्वयं तस्मै शुक्रस्तुष्टो ददाति हि ॥४॥

॥ इति श्री ब्रह्माण्ड पुराणे शुक्रस्तोत्रं सम्पूर्णम् ॥

॥ शनि मंत्र ॥

शनि सौराष्ट्र देश में उद्भव। कश्यप गोत्र। जाति असुर। माता छाया। कृष्ण वर्ण। पश्चिम दिशा।

- **शुभाशुभत्व - पाप ग्रह**
- **भोग काल - ढाई वर्ष - 912.5 दिन**
- **बीज मंत्र - ॐ शं शनैश्चराय नमः / ॐ ऐं ह्रीं श्रीं शनैश्चराय नमः / ॐ शनये नमः**
- **तांत्रिक मंत्र - ॐ प्राँ प्रीं प्रौं सः शनैश्चराय नमः**
- **वैदिक मंत्र - ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये।
शँयो रभिस्त्रवन्तु नः ॥**
- **पुराणोक्त मंत्र - ॐ नीलांजन समाभासं रविपुत्रं यमाग्रजम।
छायामार्तण्ड संभूतं तं नमामि शनैश्चरम ॥**
- **जप संख्या - 23000 कलयुगे चतुर्थगुणो अर्थात 92000 + दशांश हवन - 9200 + दशांश तर्पण - 920 + दशांश मार्जन - 92 = 102212**
- **जप समय - मध्यान**
- **हवनवस्तु - शमी**
- **रत्न - 5 से 7.5 रत्ति नीलम (लोहा)**
- **दान वस्तु - सुवर्ण, नीलम, उडद, तिल, तेल, भैस, लोहा, कृष्णपुष्प, कृष्णवस्त्र, कालीगाय**

शनि कवचम् .....

विनियोग - अस्य श्री शनैश्चर कवच स्तोत्र मन्त्रस्य। कश्यप ऋषिः। अनुष्टुप् छन्द। शनैश्चरो देवता। श्री शक्तिः। शूं कीलकम्। शनैश्चर प्रीत्यर्थे पाठे विनियोगः।

**नीलाम्बरो नीलवपुः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान्।
चतुर्भुजः सूर्यसुतः प्रसन्नः सदा मम स्याद्वरदः प्रशान्तः ॥१॥**

ब्रह्मोवाच

**श्रृणुध्वमृषयः सर्वे शनिपीडाहरं महत्।
कवचं शनिराजस्य सौरेरिदमनुत्तमम् ॥२॥**

**कवचं देवतावासं वज्रपंजरसंज्ञकम्।
शनैश्चरप्रीतिकरं सर्वसौभाग्यदायकम् ॥३॥**

**ॐ श्रीशनैश्चरः पातु भालं मे सूर्यनंदनः।
नेत्रे छायात्मजः पातु कर्णो यमानुजः ॥४॥**

**नासां वैवस्वतः पातु मुखं मे भास्करः सदा।
स्निग्धकण्ठश्च मे कण्ठ भुजौ पातु महाभुजः ॥५॥**

**स्कन्धौ पातु शनिश्चैव करौ पातु शुभप्रदः।
वक्षः पातु यमभ्राता कुक्षिं पात्वसितस्थता ॥६॥**

**नाभिं गृहपतिः पातु मन्दः पातु कटिं तथा।
ऊरू ममाऽन्तकः पातु यमो जानुयुगं तथा ॥७॥**

**पदौ मन्दगतिः पातु सर्वांग पातु पिप्पलः।
अंगोपांगानि सर्वाणि रक्षेन् मे सूर्यनन्दनः ॥८॥**

**इत्येतत् कवचं दिव्यं पठेत् सूर्यसुतस्य यः।
न तस्य जायते पीडा प्रीतो भवन्ति सूर्यजः ॥९॥**

व्ययजन्मद्वितीयस्थो मृत्युस्थानगतोऽपि वा।
कलत्रस्थो गतोवाऽपि सुप्रीतस्तु सदा शनिः ॥१०॥

अष्टमस्थे सूर्यसुते व्यये जन्मद्वितीयगे।
कवचं पठते नित्यं न पीडा जायते क्वचित् ॥११॥

इत्येतत् कवचं दिव्यं सौरेर्यन्निर्मितं पुरा।
जन्मलग्नस्थितान्दोषान् सर्वान्नाशयते प्रभुः ॥१२॥

॥ श्री ब्रह्माण्डपुराणे ब्रह्म-नारद संवादे शनैश्चर कवचं संपूर्ण ॥

शनि स्तोत्रम् .....

नमः कृष्णाय नीलाय शितिकण्ठ निभाय च।
नमः कालाग्निरूपाय कृतान्ताय च वै नमः ॥१॥

नमो निर्मांस देहाय दीर्घश्मश्रुजटाय च।
नमो विशालनेत्रय शुष्कोदर भयाकृते ॥२॥

नमः पुष्कलगात्रय स्थूलरोम्णेऽथ वै नमः।
नमो दीर्घायशुष्काय कालदष्ट्र नमोऽस्तुते ॥३॥

नमस्ते कोटराक्षाय दुर्निरीक्ष्याय वै नमः।
नमो घोराय रौद्राय भीषणाय कपालिने ॥४॥

नमस्ते सर्वभक्षाय वलीमुखायनमोऽस्तुते।
सूर्यपुत्र नमस्तेऽस्तु भास्करे भयदाय च ॥५॥

अधोदृष्टेः नमस्तेऽस्तु संवर्तक नमोऽस्तुते।
नमो मन्दगते तुभ्यं निरिस्त्रणाय नमोऽस्तुते ॥६॥

तपसा दग्धदेहाय नित्यं योगरताय च।
नमो नित्यं क्षुधार्ताय अतृप्ताय च वै नमः ॥७॥

ज्ञानचक्षुर्नमस्तेऽस्तु कश्यपात्मज सूनवे।
तुष्टो ददासि वै राज्यं रुष्टो हरसि तत्क्षणात् ॥८॥

देवासुरमनुष्याश्च सिद्धि विद्याधरोरगाः।
त्वया विलोकिताः सर्वे नाशंयान्ति समूलतः ॥९॥

प्रसाद कुरु मे देव वाराहोऽहमुपागत।
एवं स्तुतस्तदा सौरिर्ग्रहराजो महाबलः ॥१०॥

विनियोग - अस्य श्री शनैश्चर स्तोत्रं। दशरथः ऋषि। शनैश्चरो देवता। त्रिष्टुप् छंद।
शनैश्चर प्रीत्यर्थे जपे विनियोगः ॥

दशरथ उवाच

कोणोऽन्तका रौद्रयमोऽख बभ्रुःकृष्णः शनि पिंगलमन्दसौरि।
नित्य स्मृतो यो हरते पीड़ां तस्मै नमः श्रीरविनन्दाय ॥१॥

सुरासुराः किंपु-रुषोरगेन्द्रा गन्धर्वाद्याधरपन्नगाश्च।
पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय ॥२॥

नराः नरेन्द्राः पशवो मृगेन्द्रा वन्याश्च ये कीटपतंगभृंगा।
पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय ॥३॥

देशाश्च दुर्गाणि वनानि यत्र सेनानिवेशाः पुरपत्तनानि।
पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय ॥४॥

तिलैर्यवैर्माषगुडान्नदानैर्लोहेन नीलाम्बर-दानतो वा।
प्रीणाति मन्त्रैर्निजिवासरे च तस्मै नमः श्री रविनन्दनाय ॥५॥

प्रयाग कूले यमुनातटे च सरस्वती पुण्यजले गुहायाम्।
यो योगिनां ध्यागतोऽपि सूक्ष्मस्तस्मै नमः श्री रविनन्दनाय॥६॥

अन्यप्रदेशात्स्वःगृहं प्रविष्टस्तदीयवारे स नरः सुखी स्यात।
गहाद्गतो यो न पुनः प्रयाति तस्मै नमः श्री रविनन्दनाय ॥७॥

स्त्रष्टा स्वयं भूर्भुवनत्रयस्य त्रोता हरीशो हरते पिनाकी।
एक स्त्रिधा ऋग्यजुःसाममूर्तिस्तस्मै नमः श्री रविनन्दनाय ॥८॥

शन्यष्टकं यः प्रयतः प्रयाते नित्यं सुपुत्रैः पशुबान्धवैश्च।
पठेतु सौख्यं भुवि भोगयुक्तः प्राप्नोति निर्वाण पदं तदन्ते ॥९॥

कोणस्थः पिंगलो बभ्रुः कृष्णो रौद्रान्तको यमः।
सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः ॥१०॥

एतानि दश नामानि प्रतारुत्थाय यः पठेत्।
शनैश्चकृता पीड़ा न कदाचिद् भविष्यति ॥११॥

॥ इति श्री दशरथ कृत शनि स्तोत्रम् सम्पूर्णम् ॥

॥ राहु ग्रह ॥

राहु राठिनापुर देश में उद्भव। पैठिनस गोत्र। जाति असुर। माता सिहिंका। निल वर्ण। नैऋत्य दिशा।

- **शुभाशुभत्व** - **क्रूर ग्रह**
- **भोग काल** - **डेढ़ वर्ष - 547.5 दिन**
- **बीज मंत्र** - **ॐ रां राहवे नमः / ॐ ऐं ह्रीं राहवे नमः / ॐ राहवे नमः**
- **तांत्रिक मंत्र** - **ॐ भ्राँ भ्रीं भ्रौं सः राहवे नमः**
- **वैदिक मंत्र** - **ॐ कया नश्चित्र आ भुवदूती सदावृधः सखा।
कया शचिष्ठया वृता॥**
- **पुराणोक्त मंत्र** - **ॐ अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम।
सिंहिकागर्भ संभूतं तं राहुं प्रणमाम्यहम॥**
- **जप संख्या** - **18000 कलयुगे चतुर्थगुणो अर्थात 72000 + दशांश हवन - 7200 + दशांश तर्पण - 720 + दशांश मार्जन - 72 = 79992**
- **जप समय** - **रात्रिकाल 12 बजे**
- **हवनवस्तु** - **दूर्वा**
- **रत्न** - **6.5 रत्ति गोमेद**
- **दान वस्तु** - **सुवर्ण, शीसा, गोमेद, तील, तेल, घोडा, लोहा, गेहुँ
कृष्णपुष्प, नीलवस्त्र, कम्बल, अर्भक**

राहु कवचम् .....

विनियोग - अस्य श्रीराहु कवचस्य। चन्द्रमा ऋषिः। अनुष्टुप छन्दः। रां बीजं। नभः शक्तिः।
स्वाहा कीलकम्। राहु प्रीत्यर्थे पाठे विनियोगः।

प्रणमामि सदा राहुं शूर्पाकारं किरीटिनम्।
सैन्हिकेयं करालास्यं लोकानां भयप्रदम् ॥१॥

नीलाम्बरः शिरः पातु ललाटं लोकवन्दितः।
चक्षुषी पातु मे राहुः श्रोत्रे त्वर्धशरीरवान् ॥२॥

नासिकां मे धूम्रवर्णः शूलपाणिर्मुखं मम।
जिव्हां मे सिंहिकासूनुः कंठं मे कठिनांघ्रिकः ॥३॥

भुजङ्गेशो भुजौ पातु निलमाल्याम्बरः करौ।
पातु वक्षःस्थलं मन्त्री पातु कुक्षिं विधुन्तुदः ॥४॥

कटिं मे विकटः पातु ऊरु मे सुरपूजितः।
स्वर्भानुर्जानुनी पातु जंघे मे पातु जाड्यहा ॥५॥

गुल्फ़ौ ग्रहपतिः पातु पादौ मे भीषणाकृतिः।
सर्वाणि अंगानि मे पातु निलश्चन्दनभूषणः ॥६॥

राहोरिदं कवचमृद्धिदवस्तुदं यो।
भक्त्या पठत्यनुदिनं नियतः शुचिः सन् ॥७॥

प्राप्नोति कीर्तिमतुलां श्रियमृद्धिमायुरारोग्यम्।
आत्मविजयं च हि तत्प्रसादात् ॥८॥

॥ इति श्रीमहाभारते धृतराष्ट्रसंजय सम्वादे द्रोणपर्वणि राहुकवचं सम्पूर्णम्॥

राहु स्तोत्रम् .....

विनियोग - अस्य श्री राहु स्तोत्रस्य। वामदेव ऋषिः। गायत्री छन्दः। राहुर्देवता।
राहुप्रीत्यर्थे पाठे विनियोगः॥

राहुर्दानव मन्त्री च सिंहिकाचित्तनन्दनः।
अर्धकायः सदाक्रोधी चन्द्रादित्यविमर्दनः ॥१॥

रौद्रो रुद्रप्रियो दैत्यः स्वर्भानुर्भानुमीतिदः।
ग्रहराजः सुधापायी राकातिथ्यभिलाषुकः ॥२॥

कालदृष्टिः कालरुपः श्रीकष्ठहृदयाश्रयः।
विधुंतुदः सैंहिकेयो घोररुपो महाबलः ॥३॥

ग्रहपीडाकरो द्रंष्टी रक्तनेत्रो महोदरः।
पञ्चविंशति नामानि स्मृत्वा राहुं सदा नरः ॥४॥

यः पठेन्महती पीडा तस्य नश्यति केवलम्।
विरोग्यं पुत्रमतुलां श्रियं धान्यं पशूंस्तथा ॥५॥

ददाति राहुस्तस्मै यः पठते स्तोत्रमुत्तमम्।
सततं पठते यस्तु जीवेद्वर्षशतं नरः ॥६॥

॥ इति श्रीस्कन्दपुराणे राहुस्तोत्रं संपूर्णम् ॥

॥ केतु मंत्र ॥

केतु अंतर्वेदी देश में उत्पत्ति। जैमिनी गोत्र। जाति असुर। धूम्र वर्ण। वायव्य दिशा। छाया ग्रह।

- **शुभाशुभत्व - पाप ग्रह**
- **भोग काल - डेढ़ वर्ष - 547.5 दिन**
- **बीज मंत्र - ॐ कं केतवे नम: / ॐ ह्रीं ऐं केतवे नम: / ॐ केतवे नम:**
- **तांत्रिक मंत्र - ॐ स्रां स्रीं स्रौं स: केतवे नम:**
- **वैदिक मंत्र - ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषभ्दिरजायथा:॥**
- **पुराणोक्त मंत्र - ॐ पलाश पुष्प संकाशं तारका ग्रह मस्तकम। रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम॥**
- **जप संख्या - 17000 कलयुगे चतुर्थगुणो अर्थात 68000 + दशांश हवन - 6800 + दशांश तर्पण - 680 + दशांश मार्जन - 68 = 75548**
- **जप समय - रात्रिकाल 12 बजे**
- **हवनवस्तु - कुशा**
- **रत्न - 6.5 रत्ति लहसुनीया (पोलाद)**
- **दान वस्तु - सुवर्ण, लहसुनीया, पोलाद, तील, तेल, बकरी, कृष्णवस्त्र, धूम्रपुष्प, कम्बल, शस्त्र**

केतु कवचम् .....

विनियोग - अस्य श्रीकेतु कवच स्तोत्र मन्त्रस्य। त्रयम्बक ऋषिः। अनुष्टप् छन्दः। केतुर्देवता। कं बीजं। नमः शक्तिः। केतुरिति कीलकम्। केतु प्रीत्यर्थं पाठे विनियोगः।

**केतु करालवदनं चित्रवर्णं किरीटिनम्।
प्रणमामि सदा केतुं ध्वजाकारं ग्रहेश्वरम् ॥१॥**

**चित्रवर्णः शिरः पातु भालं धूम्रसमद्युतिः।
पातु नेत्रे पिंगलाक्षः श्रुती मे रक्तलोचनः ॥२॥**

**घ्राणं पातु सुवर्णाभश्चिबुकं सिंहिकासुतः।
पातु कंठं च मे केतुः स्कन्धौ पातु ग्रहाधिपः ॥३॥**

**हस्तौ पातु श्रेष्ठः कुक्षिं पातु महाग्रहः।
सिंहासनः कटिं पातु मध्यं पातु महासुरः ॥४॥**

**ऊरुं पातु महाशीर्षो जानुनी मेऽतिकोपनः।
पातु पादौ च मे क्रूरः सर्वाङ्गं नरपिंगलः ॥५॥**

**य इदं कवचं दिव्यं सर्वरोगविनाशनम्।
सर्वशत्रुविनाशं च धारणाद्विजयि भवेत् ॥६॥**

॥ इति श्रीब्रह्माण्डपुराणे केतुकवचं सम्पूर्णम् ॥

केतु स्तोत्रम् .....

विनियोग - अस्य श्रीकेतु पंच विंशति नाम स्तोत्रस्य । मधुपछन्द: ऋषिः । गायत्री छन्दो: । केतुर्देवता । केतु प्रीत्यर्थे पाठे विनियोगः ।

केतु: काल: कलयिता धूम्रकेतुर्विवर्णक: ।
लोककेतुर्महाकेतु: सर्वकेतुर्भयप्रद: ॥१॥

रौद्रो रूद्रप्रियो रूद्र: क्रूरकर्मा सुगन्धक् ।
फलाशधूमसंकाशश्चित्रयज्ञोपवीतधृक् ॥२॥

तारागणविमर्दो च जैमिनेयो ग्रहाधिप:।
पंचविंशति नामानि केतुर्य: सततं पठेत् ॥३॥

तस्य नश्यंति बाधाश्चसर्वा: केतुप्रसादत:।
धनधान्यपशूनां च भवेद् व्रद्धिर्नसंशय: ॥४॥

॥ इति श्री केतु स्तोत्रम् सम्पूर्णम् ॥